Amritanilayam Stotras

4.1 - ???????? ?????????? - ????? ???????? ????????? ?????? ????

कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया - ञ्चतुर्थकाण्डे प्रथमः प्रश्नः - अग्निचित्यङ्ग मन्त्रपाठाभिधानं

ओ -न्नमः परमात्मने , श्री महागणपतये नमः , श्री गुरुभ्यो नमः । ह॒रि॒ः ओम् ॥

यु॒ञ्जा॒नः प्र॑थ॒म -म्मन॑स्त॒त्वाय॑ सवि॒ता धिय॑ः । अ॒ग्नि -ञ्ज्योति॑र्नि॒चाय्य॑ पृथि॒व्या अद्ध्या ऽभ॑रत् ॥ यु॒क्त्वाय॒ मन॑सा दे॒वान् - थ्सुव॑र्य॒तो धि॒या दिव᳚म् । बृ॒हज्ज्योति॑ः करिष्य॒त -स्स॑वि॒ता प्रसु॑वाति॒ तान् ॥ यु॒क्तेन॒ मन॑सा व॒य -न्दे॒वस्य॑ सवि॒तु -स्स॒वे । सु॒व॒र्गेया॑य॒ शक्त्यै ᳚ ॥ यु॒ञ्जते॒ मन॑ उ॒त यु॑ञ्जते॒ धियो॒ विप्रा॒ विप्र॑स्य बृह॒तो वि॑प॒श्चित॑ः । वि होत्रा॑ दधे वयुना॒ विदेक॒ इ - [वयुना॒ विदेक॒ इत् , म॒ही दे॒वस्य॑] 1

-न्म॒ही दे॒वस्य॑ सवि॒तुः परि॑ष्टुतिः ॥ यु॒जे वा॒ -म्ब्रह्म॑ पू॒र्व्य -न्नमो॑भि॒र्वि श्लोका॑ यन्ति प॒थ्ये॑व॒ सूराः ᳚ । शृ॒ण्वन्ति॒ विश्वे॑ अ॒मृत॑स्य पु॒त्रा आ ये धामा॑नि दि॒व्यानि॑ त॒स्थुः ॥ यस्य॑ प्र॒याण॒मन्व॒न्य इद्य॒युर्दे॒वा दे॒वस्य॑ महि॒मान॒मर्च॑तः । यः पार्थि॑वानि विम॒मे स एत॑शो॒ रजाग्ं॑सि दे॒व - स्स॑वि॒ता म॑हित्व॒ना ॥ देव॑ सवित॒ः प्रसु॑व य॒ज्ञ -म्प्रस॑व [ ] 2

य॒ज्ञप॑ति॒ -म्भगा॑य दि॒व्यो ग॑न्ध॒र्वः । के॒त॒पूः केत॑न्नः पुनातु वा॒चस्पति॒र्वाच॑म॒द्य स्व॑दाति नः ॥ इ॒म -न्नो॑ देव सवितर्य॒ज्ञ -म्प्रसु॑व देवा॒युवग्ं॑ सखि॒विदग्ं॑ सत्रा॒जित॑ -न्धन॒जितग्ं॑ सुव॒र्जित᳚म् ॥ ऋ॒चा स्तोम॒ग्ं॒ सम॑र्धय

गाय॒त्रेण॑ रथन्त॒रम् । बृ॒ह -द्गा॑य॒त्रव॑र्तनि
॥ दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे᳚
ऽश्विनो᳚र्बा॒हुभ्या᳚ -म्पू॒ष्णो हस्ता᳚भ्या -
ङ्गाय॒त्रेण॒ छन्द॒सा ऽऽद॑दे -
ऽङ्गिर॒स्वदभ्रि॑रसि॒ नारि॑ - [नारिः॑ , अ॒सि॒
पृ॒थि॒व्या -स्स॒धस्था॑ -] 3

-रसि पृथि॒व्या -स्स॒धस्था॑ -द॒ग्नि -
म्पु॑री॒ष्य॑मङ्गिर॒स्वदा भ॑र॒ त्रैष्टु॑भेन
त्वा॒ छन्द॒सा ऽऽद॑दे -ऽङ्गिर॒स्व -द्बभ्रि॑रसि॒
नारि॑रसि॒ त्वया॑ व॒यग्ं स॒धस्थ॒ आग्निग्ं
श॑केम॒ खनि॑तु -म्पुरी॒ष्य॑ -ञ्जाग॑तेन त्वा॒
छन्द॒सा ऽऽद॑दे -ऽङ्गिर॒स्वद्धस्त॑ आ॒धाय॑
सवि॒ता बिभ्र॒दभ्रिग्ं॑ हिर॒ण्ययी᳚म् । तया॒
ज्योति॒रज॑स्र॒ -मिद॒ग्नि -ङ्खा॒त्वी न॒ आ
भ॒रानु॑ष्टुभेन त्वा॒ छन्द॒सा ऽऽद॑दे -
ऽङ्गिर॒स्वत् ॥ 4 ॥
(इ –द्य॒ज्ञ -म्प्रसु॑व॒ – नारि॒ – रानु॑ष्टुभेन
त्वा॒ छन्द॑सा॒ – त्रीणि॑ च) (अ. 1)

इ॒माम॑गृभ्ण -न्रश॒नामृ॒तस्य॒ पूर्व॒ आयु॑षि
वि॒दथे॑षु क॒व्या । तया॑ दे॒वा -स्सु॒तमा
ब॑भूवुर् -ऋ॒तस्य॒ साम᳚न् -थ्स॒रमा॒रप॑न्ती ॥
प्रतू᳚र्तं -वाँजि॒न्ना द्र॑व॒ वरि॑ष्ठा॒मनु॑
सं॒ वँत᳚म् । दि॒वि ते॒ जन्म॑ पर॒मम॒न्तरि॑क्षे॒
नाभिः॑ पृथि॒व्यामधि॒ योनिः॑ ॥ यु॒ञ्जाथा॒ग्ं॒
रास॑भं -युँ॒वम॒स्मिन् . यामे॑ वृषण्वसू । अ॒ग्नि -
म्भर॑न्तमस्म॒युम् ॥ योगे॑योगे त॒वस्त॑रं॒ -
वाँजे॑वाजे हवामहे । सखा॑य॒ इन्द्र॑म॒तये᳚ ॥
प्र॒तूर्व॒ - [प्र॒तूर्वन्न्॑ ,
एह्य॑व॒क्राम॒न्नश॑स्ती] 5

-न्नेह्य॑व॒क्राम॒न्नश॑स्ती रु॒द्रस्य॒
गाण॑पत्या -न्मयो॒भूरेहि॑ ।
उ॒र्व॑न्तरि॑क्ष॒मन्वि॑हि स्व॒स्ति
ग॑व्यूति॒रभ॑यानि कृ॒ण्वन्न् ॥ पू॒ष्णा स॒युजा॑
स॒ह । पृ॒थि॒व्या -स्स॒धस्था॑द॒ग्नि -
म्पु॑रि॒ष्य॑ -मङ्गिर॒स्व -दच्छे᳚ह्य॒ग्नि -
म्पु॑री॒ष्य॑ -मङ्गिर॒स्वद -च्छे॑मो॒ -ऽग्नि -
म्पु॑री॒ष्य॑ -मङ्गिर॒स्व -द्भ॑रिष्यामो॒ -ऽग्नि -
म्पु॑री॒ष्य॑ -मङ्गिर॒स्व -द्भ॑रामः ॥

अन्व॒ग्निरु॒षसा॒ -मग्र॑मख्य॒ -दन्वहा॑नि
प्रथ॒मो जा॒तवे॑दाः । अनु॒ सूर्य॑स्य [सूर्य॑स्य ,
पु॒रु॒त्रा च॑] 6

पुरु॒त्रा च॑ र॒श्मीननु॒ द्यावा॑पृथि॒वी आ त॑तान
॥ आ॒गत्य॑ वा॒ज्यद्ध्व॑न॒ -स्सर्वा॒ मृधो॒
विधू॑नुते । अ॒ग्निग्ं स॒धस्थे॑ मह॒ति चक्षु॑षा॒
नि चि॑कीषते ॥ आ॒क्रम्य॑ वाजि -
न्पृथि॒वीम॒ग्निमि॑च्छ रु॒चा त्वम् । भूम्या॑
वृ॒त्वाय॑ नो ब्रूहि॒ यतः॒ खना॑म॒ तं -वँ॒यम् ॥
द्यौस्ते॑ पृ॒ष्ठ -म्पृ॑थि॒वी स॒धस्थ॑मा॒त्मा
ऽन्तरि॑क्षग्ं समु॒द्रस्ते॒ योनिः॑ । वि॒ख्याय॒
चक्षु॑षा॒ त्वम॒भि ति॑ष्ठ [त्वम॒भि ति॑ष्ठ ,
पृ॒त॒न्य॒तः ।] 7

पृतन्य॒तः ॥ उत्क्रा॑म मह॒ते सौभ॑गाया॒ -
स्मादा॒स्थाना᳚ -द्द्रविणो॒दा वा॑जिन्न् ।
व॒यग्ग् स्या॑म सुम॒तौ पृ॑थि॒व्या अ॒ग्नि -
ङ्ख॑नि॒ष्यन्त॑ उ॒पस्थे॑ अस्याः ॥ उद॑क्रमी -
द्द्रविणो॒दा वा॒ज्यर्वा -ऽक॒ -स्स लो॒कग्ं सुकृ॑त
-म्पृथि॒व्याः । ततः॑ खनेम सु॒प्रती॑कम॒ग्निग्ं
सुवो॒ रुहा॑णा॒ अधि॒ नाक॑ उत्त॒मे ॥ अ॒पो
दे॒वीरुप॑ सृज॒ मधु॑मतीरय॒क्ष्माय॑
प्र॒जाभ्यः॑ । तासा॒ग्॒ स्थाना॒दुज्जि॑हता॒ -
मोष॑धय -स्सुपिप्प॒लाः ॥ जिघ॑ - [जिघ॑र्मि , अ॒ग्नि -
म्मन॑सा] 8

-र्म्य॒ग्नि -म्मन॑सा घृ॒तेन॑ प्रति॒क्ष्यन्त॒ -
म्भुव॑नानि॒ विश्वा᳚ । पृ॒थु -न्ति॑र॒श्चा वय॑सा
बृ॒हन्तं॒ -व्यँचि॑ष्ठ॒मन्नग्ं॑ रभ॒सं -
विँदा॑नम् ॥ आ त्वा॑ जिघर्मि॒ वच॑सा घृ॒तेना॑ -
ऽर॒क्षसा॒ मन॑सा॒ तज्जु॑षस्व । मर्य॑श्री -
स्स्पृह॒य -द्व॑र्णो अ॒ग्निर्ना -ऽभि॒मृशे॑
त॒नुवा॒ जर् हृ॑षाणः ॥ परि॒ वाज॑पतिः
क॒विर॒ग्निर् -ह॒व्यान्य॑क्रमीत् । दध॒ -
द्रत्ना॑नि दा॒शुषे᳚ ॥ परि॑ त्वा -ऽग्ने॒ पुरं॑ -
वँ॒यं -विँप्रग्ं॑ सहस्य धीमहि । धृ॒ष -द्व॑र्ण -
न्दि॒वेदि॑वे भे॒त्तार॑ -म्भङ्गु॒राव॑तः ॥
त्वम॑ग्ने॒ द्युभि॒स्त्व -मा॑शुशु॒क्षणि॒स्त्व -
म॒द्भ्यस्त्व -मश्म॑न॒स्परि॑ । त्वं -वँने᳚भ्य॒
स्त्वमोष॑धीभ्य॒ स्त्व -न्नृ॒णा -न्नृ॑पते जायसे॒

शुचि॑ः ॥ 9 ॥
(प्र॒तूर्व॒न्थ् – सूर्य॑स्य – तिष्ठ॒ –
जिघ॑र्मि **–** भे॒त्तार॑ं **–** विँग्ं॒श॒तिश्च॑ **) (**अ **. 2)**

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे ᳚ -ऽश्विनो ᳚
बा॒हुभ्या ᳚ -म्पू॒ष्णो हस्ता ᳚भ्या -
म्पृथि॒व्या -स्स॒धस्थे॒ -ऽग्नि -म्पु॑री॒ष्य॑ -
मङ्गि॒रस्व -त्ख॑नामि ॥ ज्योति॑ष्मन्त -न्त्वा -
ऽग्ने सु॒प्रती॑क॒मज॑स्रेण भा॒नुना॒
दीद्या॑नम् । शि॒व -म्प्र॒जाभ्यो -ऽहिग्ं॑ सन्त -
म्पृथि॒व्या -स्स॒धस्थे॒ -ऽग्नि -म्पु॑री॒ष्य॑ -
मङ्गि॒रस्व -त्ख॑नामि ॥ अ॒पा -म्पृ॒ष्ठम॑सि
स॒प्रथा॑ उ॒र्व॑ग्नि -म्भ॑रि॒ष्यदप॑रावपिष्ठम्
। वर्ध॑मान -म्म॒ह आ च॒ पुष्क॑र -न्दि॒वो मात्र॑या
वरि॒णा प्र॑थस्व ॥ शर्म॑ च स्थो॒ [शर्म॑ च स्थः ,
वर्म॑ च] 10

वर्म॑ च स्थो॒ अच्छि॑द्रे बहु॒ले उ॒भे ।
व्यच॑स्वती॒ सं -वँ॑साथा -म्भ॒र्तम॒ग्नि -
म्पु॑री॒ष्य ᳚म् ॥ सं वँ॑साथाग्ं सुव॒र्विदा॑
स॒मीची॒ उर॑सा॒ त्मना ᳚ । अ॒ग्निम॒न्त
र्भ॑रि॒ष्यन्ती॒ ज्योति॑ष्मन्त॒ मज॑स्र॒मित् ॥
पु॒री॒ष्यो॑ -ऽसि वि॒श्वभ॑राः । अथ॑र्वा त्वा
प्र॒थ॒मो निर॑मन्थदग्ने ॥ त्वाम॑ग्ने॒
पुष्क॑रा॒दद्ध्यथ॑र्वा॒ निर॑मन्थत । मू॒र्ध्नो
विश्व॑स्य वा॒घत॑ः ॥ तमु॑ त्वा द॒द्ध्यङ्ङृषि॑ः
पु॒त्र ई॑धे॒ [पु॒त्र ई॑धे , अथ॑र्वणः ।] 11

अथ॑र्वणः । वृ॒त्र॒हण॑ं -म्पुरन्द॒रम् ॥ तमु॑ त्वा
पा॒थ्यो वृषा॒ समी॑धे दस्यु॒हन्त॑मम् ।
ध॒न॒ञ्ज॒यग्ं रणे॑रणे ॥ सीद॑ होत॒ -स्स्व उ॑ लो॒के
चि॑कि॒त्वान् -थ्सा॒दया॑ य॒ज्ञग्ं सु॑कृ॒तस्य॒
योनौ ᳚ । दे॒वा॒वीर्दे॒वान् . ह॒विषा॑
यजा॒स्यग्ने॑ बृ॒ह -द्यज॑माने॒ वयो॑ धाः ॥ नि
होता॑ होतृ॒षद॑ने॒ विदा॑नस्त्वे॒षो
दी॑दि॒वाग्ं अ॑सद -थ्सु॒दक्ष॑ः । अद॑ब्धव्रत
प्रमति॒र्वसि॑ष्ठ -स्सहस्र -म्भ॒र -श्शुचि॑जिह्वो
अ॒ग्निः ॥ सग्ं सी॑दस्व म॒हाग्ं अ॑सि॒ शोच॑स्व [
शोच॑स्व , दे॒व॒वीत॑मः ।] 12

देव॒वीत॑मः । वि धू॒मम॑ग्ने अरु॒ष -म्मि॑येद्ध्य
सृ॒ज प्र॑शस्त दर् श॒तम् ॥ जनि॑ष्वा॒ हि जेन्यो॒
अग्रे॒ अह्नाग्ं॑ हि॒तो हि॒तेष्व॑रु॒षो वने॑षु ।
दमे॑दमे स॒प्त रत्ना॒ दधा॑नो॒ -ऽग्निर् होता॒ नि
ष॑सादा॒ यजी॑यान् ॥ 13 ॥
(स्थ॒ – ई॒धे॒ – शोच॑स्व – स॒प्तविग्ं॑शतिश्च) – (
अ. 3)

स -न्ते॑ वा॒युर्मा॑त॒रिश्वा॑ दधातूत्ता॒नायै॒
हृद॑यं॒ -यँद्विलि॑ष्टम् । दे॒वानां॒ -यँश्चर॑ति
प्रा॒णथे॑न॒ तस्मै॑ च देवि॒ वष॑डस्तु॒ तुभ्य᳚म् ॥
सुजा॑तो॒ ज्योति॑षा स॒ह शर्म॒ वरू॑थ॒मा -ऽस॑द॒ -
स्सुवः॑ । वासो॑ अग्ने वि॒श्वरू॑प॒ग्ं॒ सं
व्यँ॑यस्व विभावसो ॥ उदु॑ तिष्ठ स्वद्ध्व॒रावा॑
नो दे॒व्या कृ॒पा । दृ॒शे च॑ भा॒सा बृ॑ह॒ता
सु॑शु॒क्वनि॒रा -ऽग्ने॑ याहि सुश॒स्तिभिः॑ ॥ 14 ॥

ऊ॒र्ध्व ऊ॒ षु ण॑ ऊ॒तये॒ तिष्ठा॑ दे॒वो न स॑वि॒ता ।
ऊ॒र्ध्वो वाज॑स्य॒ सनि॑ता॒ यद॒ञ्जिभि॑ -
र्वा॒घद्भि॑ -र्वि॒ह्वया॑महे ॥ स जा॒तो गर्भो॑
असि॒ रोद॑स्यो॒रग्ने॒ चारु॒र्विभृ॑त॒ ओष॑धीषु ।
चि॒त्र -श्शिशुः॒ परि॒ तमाग्॑स्य॒क्तः प्र
मा॒तृभ्यो॒ अधि॒ कनि॑क्रदद्गाः ॥ स्थि॒रो भ॑व
वी॒ड्व॑ङ्ग आ॒शुर्भ॑व वा॒ज्य॑र्वन्न् ।
पृ॒थुर्भ॑व सु॒षद॒स्त्वम॒ग्नेः पु॑रीष॒वाह॑नः
॥ शि॒वो भ॑व [ ] 15

प्र॒जाभ्यो॒ मानु॑षीभ्य॒स्त्वम॑ङ्गिरः । मा
द्यावा॑पृथि॒वी अ॒भि शू॑शुचो॒ मा -ऽन्तरि॑क्ष॒ -
म्मा वन॒स्पतीन्॑ ॥ प्रैतु॑ वा॒जी कनि॑क्रद॒ -
न्नान॑द॒ -द्रास॑भः॒ पत्वा᳚ । भर॑न्न॒ग्नि -
म्पु॑री॒ष्य॑ -म्मा पा॒द्यायु॑षः पु॒रा ॥ रास॑भो
वा॒ -ङ्कनि॑क्रद॒ -थ्सुयु॑क्तो वृषणा॒ रथे᳚ । स
वा॑म॒ग्नि -म्पु॑री॒ष्य॑मा॒शुर्दू॒तो व॑हादि॒तः
॥ वृषा॒ -ऽग्निं -वृँष॑ण॒ -म्भर॑न्न॒पा -ङ्गर्भग्ं॑
समु॒द्रिय᳚म् । अग्न॒ आ या॑हि [ ] 16

वी॒तय॑ ऋ॒तग्ं स॒त्यम् ॥ ओष॑धयः॒ प्रति॑
गृह्णीता॒ -ऽग्निमे॒तग्ं शि॒वमा॒यन्त॑म॒भ्यत्र॑
यु॒ष्मान् । व्यस्य॒न् विश्वा॒ अम॑ती॒ररा॑ती -
र्नि॒षीद॑न्नो॒ अप॑ दुर्म॒तिग्ं ह॑नत् ॥ ओष॑धयः॒

प्रति॑ मोदद्ध्वमेन॒ -म्पुष्पा॑वती -
स्सुपिप्प॒लाः । अ॒यं -वो॒ँ गर्भ॑ ऋ॒त्विय॑ः
प्र॒त्नग्ं स॒धस्थ॒मा ऽस॑दत् ॥ 17 ॥
(सु॒श॒स्तिभि॑ः – शि॒वो भ॑व – याहि॒ –
षट्त्रिग्ं॑शच्च) (अ . 4)

वि पाज॑सा पृ॒थुना॒ शोशु॑चानो॒ बाध॑स्व द्वि॒षो
र॒क्षसो॒ अमी॑वाः । सु॒शर्म॑णो बृ॒हत -श्शर्म॑णि
स्याम॒ग्नेर॒हग्ं सु॒हव॑स्य॒ प्रणी॑तौ ॥ आपो॒ हि
ष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन । म॒हे
रणा॑य॒ चक्ष॑से ॥ यो व॑ -श्शि॒वत॑मो॒ रस॒स्तस्य॑
भाजयते॒ह न॑ः । उ॒श॒तीरि॑व मा॒तर॑ः ॥ तस्मा॒ अर॑ -
ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ । आपो॑
ज॒नय॑था च नः ॥ मि॒त्र - [मि॒त्रः , स॒ग्ं॒सृज्य॑] 18

-स्स॒ग्ं॒सृज्य॑ पृथि॒वी -म्भूमि॑ -ञ्च॒ ज्योति॑षा
स॒ह । सु॒जा॑त -ञ्जा॒तवे॑दसम॒ग्निं -वैँ ᳚श्वान॒रं -
वि॒ँभुम् ॥ अ॒य॒क्ष्माय॑ त्वा॒ सग्ं सृ॑जामि
प्र॒जाभ्य॑ः । विश्वे ᳚ त्वा दे॒वा वै ᳚श्वान॒रा -
स्सग्ं सृ॑ज॒न्त्वा -नु॑ष्टुभेन॒ छन्द॑सा -
ऽङ्गि॒र॒स्वत् ॥ रु॒द्रा -स्स॒भृन्त्य॑ पृथि॒वी -
म्बृ॒हज्ज्योति॒ -स्समी॑धिरे । तेषा ᳚ -
म्भा॒नुरज॑स्र॒ इच्छु॒क्रो दे॒वेषु॑ रोचते ॥
सग्ं सृ॒ष्टां॒ -वँसु॑भी रु॒द्रैर्धीरै॑ः ᳚
कर्म॒ण्या ᳚ -म्मृद ᳚म् । हस्ता ᳚भ्या -म्मृ॒द्वी -
ङ्कृ॒त्वा सि॑नीवा॒ली क॑रोतु॒ [सि॑नीवा॒ली
क॑रोतु , ताम् ।] 19

ताम् ॥ सि॒नी॒वा॒ली सु॑कप॒र्दा सु॑कु॒री॒रा
स्वौ॑प॒शा । सा तुभ्य॑मदिते मह॒ ओखा -न्द॑धातु॒
हस्त॑योः ॥ उ॒खा -ङ्क॑रोतु॒ शक्त्या॑ बा॒हुभ्या॒ -
मदि॑तिर्धि॒या । मा॒ता पु॒त्रं -यँथो॒पस्थे॒ सा -
ऽग्नि -म्बि॑भर्तु॒ गर्भ॒ आ ॥ म॒खस्य॒ शिरो॑ -ऽसि
य॒ज्ञस्य॑ प॒दे स्थ॑ः । वस॑वस्त्वा कृण्वन्तु
गाय॒त्रेण॒ छन्द॑सा ऽङ्गि॒र॒स्व -त्पृ॑थि॒व्य॑सि
रु॒द्रास्त्वा॑ कृण्वन्तु॒ त्रैष्टु॑भेन॒
छन्द॑सा ऽङ्गि॒र॒स्वद॒न्तरि॑क्षम - [-
ऽङ्गि॒र॒स्वद॒न्तरि॑क्षमसि , आ॒दि॒त्यास्त्वा॑] 20

-स्यादि॒त्यास्त्वा॑ कृण्वन्तु॒ जाग॑तेन॒
छन्द॑सा -ऽङ्गि॒र॒स्व -द्द्यौर॑सि॒ विश्वे ᳚ त्वा

दे॒वा वै᳚श्वान॒राः कृ॑ण्व॒न्त्वानु॑ष्टुभेन॒
छन्द॑सा -ऽङ्गिर॒स्व -द्दिशो॑ -ऽसि ध्रु॒वा -ऽसि॑
धा॒रया॒ मयि॑ प्र॒जाग्ं रा॒यस्पोष॑ -
ङ्गौप॒त्यग्ं सु॒वीर्यग्ं॑ सजा॒तान् .
यज॑माना॒या -ऽदि॑त्यै॒ रास्ना॒ -ऽस्य दि॑तिस्ते॒
बिल॑ -ङ्गृह्णातु॒ पाङ्क्ते॑न॒ छन्द॑सा
ऽङ्गिर॒स्वत् ॥ कृ॒त्वाय॒ सा म॒हीमु॒खा -
म्मृ॒न्मयीं॒ -योँनि॑म॒ग्नये᳚ । ता -
म्पु॒त्रेभ्य॒ -स्स -म्प्रा य॑च्छ॒ददि॑ति -
श्श्र॒पया॒निति॑ ॥ 21 ॥
(मि॒त्रः – क॑रो – त्व॒न्तरि॑क्षमसि॒ – प्र –
च॒त्वारि॑ च) (अ. 5)

वस॑वस्त्वा धूपयन्तु गाय॒त्रेण॒ छन्द॑सा -
ऽङ्गिर॒स्व -द्रु॒द्रास्त्वा॑ धूपयन्तु॒
त्रैष्टु॑भेन॒ छन्द॑सा -ऽङ्गिर॒स्व -
दा॑दि॒त्यास्त्वा॑ धूपयन्तु॒ जाग॑तेन॒ छन्द॑सा -
ऽङ्गिर॒स्वद् - विश्वे᳚ त्वा दे॒वा वै᳚श्वान॒रा
धू॑पय॒न्त्वानु॑ष्टुभेन॒ छन्द॑सा -ऽङ्गिर॒स्व -
दिन्द्र॑स्त्वा धूपयत्वङ्गिर॒स्व –
द्विष्णु॑स्त्वा धूपयत्वङ्गिर॒स्व -
द्वरु॑णस्त्वा धूपयत्वङ्गिर॒स्व -ददि॑तिस्त्वा
दे॒वी वि॒श्वदे᳚व्यावती पृथि॒व्या -स्स॒धस्थे᳚ -
ऽङ्गिर॒स्व -त्ख॑नत्ववट दे॒वाना᳚ -न्त्वा॒ पत्नी᳚ -
[पत्नीः᳚ , दे॒वी -र्वि॒श्वदे᳚व्यावतीः] 22

-र्दे॒वी -र्वि॒श्वदे᳚व्यावतीः पृथि॒व्या -
स्स॒धस्थे᳚ -ऽङ्गिर॒स्व -द्द॑धतूखे
धि॒षणा᳚स्त्वा दे॒वीर्वि॒श्वदे᳚व्यावतीः
पृथि॒व्या -स्स॒धस्थे᳚ -ऽङ्गिर॒स्व -
द॒भीन्ध॑तामुखे॒ ग्नास्त्वा॑
दे॒वीर्वि॒श्वदे᳚व्यावतीः पृथि॒व्या -
स्स॒धस्थे᳚ -ऽङ्गिर॒स्व -च्छ्र॑पयन्तूखे॒
वरू᳚त्रयो॒ जन॑यस्त्वा
दे॒वीर्वि॒श्वदे᳚व्यावतीः पृथि॒व्या -
स्स॒धस्थे᳚ -ऽङ्गिर॒स्व -त्प॑चन्तूखे ।
मित्रै॒तामु॒खा -म्प॑चै॒षा मा भे॑दि । ए॒ता -न्ते॒
परि॑ ददा॒म्यभि॑त्त्यै ॥ अ॒भीमा - [अ॒भीमाम् ,
म॒हि॒ना दिव॑ -म्मि॒त्रो] 23

-म्म॑हि॒ना दिव॑ -म्मि॒त्रो ब॑भूव स॒प्रथाः᳚ । उ॒त
श्रव॑सा पृथि॒वीम् ॥ मि॒त्रस्य॑ चर् षणी॒धृत॒ -
श्श्रवो॑ दे॒वस्य॑ सान॒सिम् । द्यु॒म्न -
ञ्चि॒त्रश्र॑वस्तमम् ॥ दे॒वस्त्वा॑
सवि॒तोद्व॑पतु सुपा॒णि -स्स्व॑ङ्गु॒रिः ।
सु॒बा॒हुरु॒त शक्त्या᳚ ॥ अप॑द्यमाना
पृथि॒व्याशा॒ दिश॒ आ पृ॑ण । उत्ति॑ष्ठ बृह॒ती
भ॑वो॒र्ध्वा ति॑ष्ठ ध्रु॒वा त्वम् ॥ वस॑व॒स्त्वा
ऽऽच्छृ॑न्दन्तु गाय॒त्रेण॒ छन्द॑सा -ऽङ्गिर॒स्व -
द्रु॒द्रास्त्वा -ऽऽ च्छृ॑न्दन्तु॒
त्रैष्टु॑भेन॒ छन्द॑सा -ऽङ्गिर॒स्व -
दा॑दि॒त्यास्त्वा ऽऽच्छृ॑न्दन्तु॒ जाग॑तेन॒
छन्द॑सा -ऽङ्गिर॒स्व -द्विश्वे᳚ त्वा दे॒वा
वै᳚श्वान॒रा आ च्छृ॑न्द॒न्त्वानु॑ष्टुभेन॒
छन्द॑सा -ऽङ्गिर॒स्वत् ॥ 24 ॥
(पत्नी॑ – रि॒माग्ं – रु॒द्रास्त्वा -ऽऽ
च्छृ॑न्द॒न्त्वे – का॒न्न विग्ं॑श॒तिश्च॑) (अ.
6)

समा᳚स्त्वा -ऽग्न ऋ॒तवो॑ वर्धयन्तु सं वँथ्स॒रा
ऋष॑यो॒ यानि॑ स॒त्या । स -न्दि॒व्येन॑ दीदिहि
रोच॒नेन॒ विश्वा॒ आ भा॑हि प्र॒दिशः॑ पृथि॒व्याः ॥
स -ञ्चे॒द्ध्यस्वा᳚ -ऽग्ने॒ प्र च॑ बोधयैन॒मुच्च॑
तिष्ठ मह॒ते सौभ॑गाय । मा च॑ रिषदुपस॒त्ता ते॑
अग्ने ब्र॒ह्माण॑स्ते य॒शस॑ -स्सन्तु॒ मा -ऽन्ये ॥
त्वाम॑ग्ने वृणते ब्राह्म॒णा इ॒मे शि॒वो अ॑ग्ने [
] 25

सं॒ -वँर॑णे भवा नः । स॒प॒त्न॒हा नो॑
अभिमाति॒जिच्च॒ स्वे गये॑ जागृ॒ह्य
प्र॑युच्छन्न् ॥ इ॒हैवाग्ने॒ अधि॑ धारया र॒यि -
म्मा त्वा॒ निक्र॑ -न्पूर्व॒चितो॑ निका॒रिणः॑ ।
क्ष॒त्रम॑ग्ने सु॒यम॑मस्तु॒ तुभ्य॑मुपस॒त्ता
व॑र्धता -न्ते॒ अनि॑ष्टृतः ॥ क्ष॒त्रेणा᳚ -ऽग्ने॒
स्वायु॒ -स्सग्ं र॑भस्व मि॒त्रेणा᳚ -ऽग्ने
मित्र॒धेये॑ यतस्व । स॒जा॒ताना᳚ -म्मद्ध्यम॒स्था
ए॑धि॒ राज्ञा॑मग्ने विह॒व्यो॑ दीदिही॒ह ॥ अति॒ [
अति॑, निहो॒ अति॒ स्रिधो] 26

निहो॒ अति॒ स्रिधो ऽत्यचि॑त्ति॒ -मत्यरा॑तिमग्ने
। विश्वा॒ ह्य॑ग्ने दुरि॒ता

सह॒स्वाथा॒स्मभ्यग्ं॑ स॒हवी॑राग्ं र॒यिन्दाः᳚
॥ अ॒ना॒धृ॒ष्यो जा॒तव॑दा॒ अनि॑ष्टृतो
वि॒राड॑ग्ने क्षत्र॒भृ -द्दी॑दिही॒ह । विश्वा॒
आशाः᳚ प्रमु॒ञ्च -न्मानु॑षीर्भि॒य -
श्शि॒वाभि॑र॒द्य परि॑ पाहि नो वृ॒धे ॥ बृह॑स्पते
सवितर्बो॒धयै॑न॒ग्ं॒ सग्ंशि॑त -ञ्चिथ्स -
न्त॒राग्ं सग्ं शि॑शाधि । व॒र्धयै॑न -म्मह॒ते
सौभ॑गाय॒ [सौभ॑गाय , विश्व॑ एन॒मनु॑ मदन्तु दे॒वाः
।] 27

विश्व॑ एन॒मनु॑ मदन्तु दे॒वाः ॥
अ॒मु॒त्र॒भूया॒दध॒ यद्य॒मस्य॒ बृह॑स्पते
अ॒भिश॑स्ते॒र मु॑ञ्चः । प्रत्यौ॑हता -म॒श्विना॑
मृ॒त्युम॑स्मा -द्दे॒वाना॑ -मग्ने भि॒षजा॒
शची॑भिः ॥ उद्व॒य -न्तम॑स॒स्परि॒ पश्य॑न्तो॒
ज्योति॒रुत्त॑रम् । दे॒व -न्दे॑व॒त्रा
सूर्य॒मग॑न्म॒ ज्योति॑रुत्त॒मम् ॥ 28 ॥
(इ॒मे शि॒वो अ॒ग्ने – ऽति॒ – सौभ॑गाय॒ –
चतु॑स्त्रिग्ंशच्च) (अ. 7)

ऊ॒र्ध्वा अ॑स्य स॒मिधो॑ भवन्त्यू॒र्ध्वा
शु॒क्रा शो॒चीग् ष्य॒ग्नेः । द्यु॒मत्त॑मा
सु॒प्रती॑कस्य सू॒नोः ॥ तनू॒नपा॒दसु॑रो
वि॒श्ववे॑दा दे॒वो दे॒वेषु॑ दे॒वः । प॒थ आ -
ऽन॑क्ति॒ मद्ध्वा॑ घृ॒तेन॑ ॥ मद्ध्वा॑ य॒ज्ञ -
न्न॑क्षसे प्रीणा॒नो नरा॒शग्ंसो॑ अग्ने ।
सु॒कृद्दे॒व -स्स॑वि॒ता वि॒श्ववा॑रः ॥
अच्छा॒यमे॑ति॒ शव॑सा घृ॒तेने॑डा॒नो
वह्नि॒र्नम॑सा । अ॒ग्निग्ग् स्रुचो॑
अद्ध्व॒रेषु॑ प्र॒यथ्सु॑ ॥ स य॑क्षदस्य
महि॒मान॑म॒ग्ने -स्स [महि॒मान॑म॒ग्ने -स्सः, ई॒
म॒न्द्रासु॑ प्र॒यसः॑ ।] 29

ई॑ म॒न्द्रासु॑ प्र॒यसः॑ । वसु॒श्चेति॑ष्ठो
वसु॒धात॑मश्च ॥ द्वारो॑ दे॒वीरन्व॑स्य॒ विश्वे᳚
व्र॒ता द॑दन्ते अ॒ग्नेः । उ॒रु॒व्यच॑सो॒ धाम्ना॒
पत्य॑मानाः ॥ ते अ॑स्य॒ योष॑णे दि॒व्ये न
योना॑वु॒षासा॒नक्ता᳚ । इ॒मं -यँ॒ज्ञम॑वता
मद्ध्व॒र -न्नः॑ ॥ दैव्या॑ होतारावू॒र्ध्व -
म॑द्ध्व॒र -न्नो॒ -ऽग्नेर्जि॒ह्वाम॒भि गृ॑णीतम् ।
कृ॒णु॒त -न्न॒ -स्स्वि॑ष्टिम् ॥ ति॒स्रो

दे॒वीर्ब॒र्॒हिरेदग्ं स॑द॒न्त्विडा॒ सर॑स्वती॒
[सर॑स्वती , भार॑ती ।] 30

भार॑ती । म॒ही गृ॑णा॒ना ॥ तन्न॑स्तु॒रीप॒मद्भु॑त
-म्पुरु॒क्षु त्वष्टा॑ सु॒वीर᳚म् । रा॒यस्पोषं॒ -
विँ ष्य॑तु॒ नाभि॑म॒स्मे ॥ वन॑स्प॒ते -ऽव॑ सृजा॒
ररा॑ण॒स्त्मना॑ दे॒वेषु॑ । अ॒ग्निर् ह॒व्यग्ं
श॑मि॒ता सू॑दयाति ॥ अग्ने॒ स्वाहा॑ कृणुहि
जातवेद॒ इन्द्रा॑य ह॒व्यम् । विश्वे॑ दे॒वा
ह॒विरि॒द -ञ्जु॑षन्ताम् ॥ हि॒र॒ण्य॒ग॒र्भ -
स्सम॑वर्त॒ताग्रे॑ भू॒तस्य॑ जा॒तः पति॒रेक॑
आसीत् । स दा॑धार पृथि॒वी -न्द्या - [पृथि॒वी -
न्द्याम् , उ॒तेमा -ङ्कस्मै॑] 31

-मु॒तेमा -ङ्कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ यः
प्रा॑ण॒तो नि॑मिष॒तो म॑हि॒त्वैक॒ इद्राजा॒
जग॑तो ब॒भूव॑ । य ईशे॑ अ॒स्य
द्वि॒पद॒श्चतु॑ष्पदः॒ कस्मै॑ दे॒वाय॑ ह॒विषा॑
विधेम ॥ य आ᳚त्म॒दा ब॑ल॒दा यस्य॒ विश्व॑ उ॒पास॑ते
प्र॒शिषं॒ -यँस्य॑ दे॒वाः । यस्य॑ छा॒या -ऽमृतं॒ -
यँस्य॑ मृ॒त्युः कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥
यस्ये॒मे हि॒मव॑न्तो महि॒त्वा यस्य॑ समु॒द्रग्ं
र॒सया॑ स॒हा - [स॒ह, आ॒हुः ।] 32

-ऽऽहुः । यस्ये॒माः प्र॒दिशो॒ यस्य॑ बा॒हू कस्मै॑
दे॒वाय॑ ह॒विषा॑ विधेम ॥ य -ङ्क्रन्द॑सी॒ अव॑सा
तस्तभा॒ने अ॒भ्यैक्षे॑ता॒ -म्मन॑सा॒ रेज॑माने ।
यत्राधि॒ सूर॒ उदि॑तौ॒ व्येति॒ कस्मै॑ दे॒वाय॑
ह॒विषा॑ विधेम ॥ येन॒ द्यौरु॒ग्रा पृ॑थि॒वी च॑
दृ॒ढे येन॒ सु॒व॑ -स्स्तभि॒तं -येँन॒ नाकः॑ । यो
अ॒न्तरि॑क्षे॒ रज॑सो वि॒मान Qःकस्मै॑ दे॒वाय॑
ह॒विषा॑ विधेम ॥ आपो॑ ह॒ यन्म॑ह॒ती र्विश्व॒ - [
यन्म॑ह॒ती र्विश्व᳚म् , अय॒ -न्दक्ष॒ -न्दधा॑ना] 33

-माय॒ -न्दक्ष॒ -न्दधा॑ना ज॒नय॑न्तीर॒ग्निम् ।
ततो॑ दे॒वाना॒ -न्निर॑वर्त॒तासु॒रेकः॒ कस्मै॑
दे॒वाय॑ ह॒विषा॑ विधेम ॥ यश्चि॒दापो॑ महि॒ना
प॒र्यप॑श्य॒ -द्दक्ष॒ -न्दधा॑ना
ज॒नय॑न्तीर॒ग्निम् । यो दे॒वेष्वधि॑ दे॒व एक॒
आसी॒ -त्कस्मै॑ दे॒वाय॑ ह॒विषा॑ विधेम ॥ 34 ॥
(अ॒ग्ने -स्स – सर॑स्वती॒ – द्याग्ं – स॒ह –

विश्वं॒ **–** चतु॑स्त्रिग्ं॒शच्च **) (**अ **. 8)**

*(*ऊ॒र्ध्वा – यः प्रा॑ण॒तो – य आ᳚त्म॒दा – यस्ये॒मे –
यङ्क्रन्द॑सी॒ – येन॒ द्यौ - रापो॑ ह॒ यत् – ततो॑
दे॒वाना॒ं – यँश्चि॒दापो॒ – यो दे॒वेषु॒ – नव॑ *)*

आकू॑तिम॒ग्नि -म्प्र॒युज॒ग्ग्॒ स्वाहा॒ मनो॑
मे॒धाम॒ग्नि -म्प्र॒युज॒ग्ग्॒ स्वाहा॑ चि॒त्तं -
विँज्ञा॑तम॒ग्नि -म्प्र॒युज॒ग्ग्॒ स्वाहा॑
वा॒चो विधृ॑तिम॒ग्नि -म्प्र॒युज॒ग्ग्॒ स्वाहा ᳚
प्र॒जाप॑तये॒ मन॑वे॒ स्वाहा॒ -ऽग्नये॑
वैश्वान॒राय॒ स्वाहा॒ विश्वे॑ दे॒वस्य॑
ने॒तुर्मर्तो॑' वृणीत स॒ख्यं -विँश्वे॑ रा॒य
इ॑षुद्ध्यसि द्यु॒म्नं -वृँ॑णीत पु॒ष्यसे॒
स्वाहा॒ मा सु भि॑त्था॒ मा सु रि॑षो॒ दृग्ं॒ह॑स्व
वी॒डय॑स्व॒ सु । अम्ब॑ धृष्णु वी॒रय॑स्वा॒ - [
वी॒रय॑स्व , अ॒ग्निश्चे॒द -ङ्क॑रिष्यथः ।] 35

-ऽग्निश्चे॒द -ङ्क॑रिष्यथः ॥ दृग्ं॒ह॑स्व देवि
पृथिवि स्व॒स्तय॑ आसु॒री मा॒या स्व॒धया॑ कृ॒ता -
ऽसि॑ । जुष्ट॑ -न्दे॒वाना॑मि॒दम॑स्तु
ह॒व्यमरि॑ष्टा॒ त्वमुदि॑हि य॒ज्ञे अ॒स्मिन्न् ॥
मि॒त्रैताम॒ुखा -न्त॑पै॒षा मा भे॑दि । ए॒ता -न्ते॒
परि॑ ददा॒म्यभि॑त्त्यै ॥ द्र्॒वन्न -
स्स॒र्पिरा॑सुतिः प्र॒त्नो होता॒ वरे᳚ण्यः ।
सह॑सस्पु॒त्रो अद्भु॑तः ॥ पर॑स्या॒ अधि॑ सं॒ वँतो
-ऽव॑राग्ं॒ अ॒भ्या [अ॒भ्या , त॒र॒ ।] 36

त॑र । यत्रा॒हमस्मि॒ ताग्ं॒ अ॑व ॥ प॒र॒मस्याः ᳚
परा॒वतो॑ रो॒हिद॑श्व इ॒हा -ऽग॑हि । पु॒री॒ष्यः॑
पुरुप्रि॒यो -ऽग्ने॒ त्व -न्त॑रा॒ मृधः॑ ॥ सीद॒ त्व -
म्मा॒तु॒रस्या उ॒पस्थे॒ विश्वा ᳚न्यग्ने
व॒युना॑नि वि॒द्वान् । मैना॑म॒र्चिषा॒ मा तप॑सा॒
-ऽभि शू॑शुचो॒ -ऽन्तर॑स्याग्ं॒ शु॒क्र
ज्योति॒॑र्वि भा॑हि ॥ अ॒न्तर॑ग्ने रु॒चा
त्वमु॒खायै॒ सद॑ने॒ स्वे । तस्या॒स्त्वग्ं॒
हर॑सा॒ तप॒न् जात॑वेद -श्शि॒वो भ॑व ॥ शि॒वो
भू॒त्वा मह्य॑म॒ग्ने -ऽथो॑ सीद शि॒वस्त्वम् ।
शि॒वाः कृ॒त्वा दिश॒ -स्सर्वा॒ -स्स्वां -
योनि॑मि॒हा -ऽऽस॑दः ॥ 37 ॥
(वी॒रय॒स्वा **–** ऽऽ **–** तप॑न् **–** विग्ं॒श॒तिश्च॑ **) (**अ **. 9)**

यद॑ग्ने॒ यानि॒ कानि॒ चा -ऽऽते॒ दारू॑णि
द॒द्ध्मसि॑ । तद॑स्तु॒ तुभ्य॒मि -द्घृ॒त -
न्तज्जु॑षस्व यविष्ठ्य ॥
यदत्त्यु॑प॒जिह्वि॑का॒ यद्व॒म्रो अ॑ति॒सर्प॑ति
। सर्व॒ -न्तद॑स्तु ते घृ॒त -न्तज्जु॑षस्व
यविष्ठ्य ॥ रात्रिग्ं॑ रात्रि॒मप्र॑याव॒ -
म्भर॒न्तो -ऽश्वा॑येव॒ तिष्ठ॑ते घा॒सम॑स्मै ।
रा॒यस्पोषे॑ण॒ समि॒षा मद॒न्तो -ऽग्ने॒ मा ते॒
प्रति॑वेशा रिषाम ॥ नाभा॑ [नाभा᳚ , पृ॒थि॒व्या -
स्स॑मिधा॒न -] 38

पृथि॒व्या -स्स॑मिधा॒न -म॒ग्निग्ं रा॒यस्पोषा॑य
बृह॒ते ह॑वामहे । इ॒र॒म्म॒द -म्बृ॒हदु॑क्थं॒ -
यँज॑त्र॒ -ञ्जेता॑रम॒ग्नि -म्पृत॑नासु सास॒हिम् ॥
या -स्सेना॑ अ॒भीत्व॑रीरा -व्या॒धिनी॒ -रुग॑णा उ॒त
। ये स्ते॒ना ये च॒ तस्क॑रा॒स्ताग् स्ते॑ अ॒ग्ने -
ऽपि॑ दधाम्या॒स्ये᳚ ॥ दग्ग् ष्ट्रा᳚भ्या -
म्म॒लिम्लू॒न् जम्भ्यै॒ -स्तस्क॑राग्ं उ॒त ।
हनू᳚भ्याग् स्ते॒नान् -भ॑गव॒स्ताग् -स्त्व -
ङ्खा॑द॒ सुखा॑दितान् ॥ ये जने॑षु म॒लिम्ल॑व -
स्स्ते॒नास॒ -स्तस्क॑रा॒ वने᳚ । ये [ ] 39

कक्षे᳚ष्वघा॒ यव॒स्ताग् स्ते॑ दधामि॒ जम्भ॑योः ॥
यो अ॒स्मभ्य॑मराती॒या -द्यश्च॑ नो॒ द्वेष॑ते॒
जनः॑ । निन्दा॒द्यो अ॒स्मा -न्दिफ्सा᳚च्च॒ सर्व॒ -
न्त -म्म॑स्म॒सा कु॑रु ॥ सग्ंशि॑त -म्मे॒ ब्रह्म॒
सग्ंशि॑तं -वीँ॒र्य॑ -म्बल᳚म् । सग्ंशि॑त -
ङ्क्ष॒त्र -ञ्जि॒ष्णु यस्या॒ -ऽहमस्मि॑
पु॒रोहि॑तः ॥ उदे॑षा -म्बा॒हू अ॑तिर॒मुद्वर्च॒
उदू॒ बल᳚म् । क्षि॒णोमि॒ ब्रह्म॑णा॒ -
ऽमित्रा॒नुन्न॑यामि॒ [-ऽमित्रा॒ -नुन्न॑यामि ,
स्वाग्ं अ॒हम् ।] 40

स्वाग्ं अ॒हम् ॥ दृ॒शा॒नो रु॒क्म उ॒र्व्या
व्य॑द्यौद्दु॒र्मर् ष॒मायु॑ -श्श्रि॒ये रु॑चा॒नः
। अ॒ग्निर॒मृतो॑ अभव॒द्वयो॑ -भि॒र्यदे॑न॒ -
न्द्यौरज॑नय -थ्सु॒रेताः᳚ ॥ विश्वा॑ रू॒पाणि॒
प्रति॑ मुञ्चते क॒विः प्रा -ऽसा॑वीद्भ॒द्र -
न्द्वि॒पदे॒ चतु॑ष्पदे । वि नाक॑मख्य -थ्सवि॒ता
वरे॒ण्यो -ऽनु॑ प्र॒याण॑मु॒षसो॒ वि॑राजति ॥
नक्तो॒षासा॒ सम॑नसा॒ विरू॑पे धा॒पये॑ते॒

शिशु॒मेकग्ं॑ समी॒ची । द्यावा॒ क्षामा॑ रु॒क्मो [
रु॒क्मः , अ॒न्तर्वि भा॑ति] 41

अ॒न्तर्वि भा॑ति दे॒वा अ॒ग्नि -न्धा॑रय -
न्द्रविणो॒दाः ॥ सु॒प॒र्णो॑ -ऽसि ग॒रुत्मा᳚ -
न्त्रि॒वृत्ते॒ शिरो॑ गाय॒त्र -ञ्चक्षु॒ -
स्स्तोम॑ आ॒त्मा साम॑ ते त॒नूर्वा॑मदे॒व्य -
म्बृ॑ह -द्रथन्त॒रे प॒क्षौ य॑ज्ञाय॒ज्ञिय॒ -
म्पुच्छ॒ -ञ्छन्दा॒ग्॒स्यङ्गा॑नि॒ धिष्णि॑या -
श्श॒फा यजूग्ं॑षि॒ नाम॑ ॥ सु॒प॒र्णो॑ -ऽसि
ग॒रुत्मा॒ -न्दिव॑ -ङ्गच्छ॒ सुवः॑ पत ॥ 42 ॥
(नाभा॒ – वने॒ ये – न॑यामि॒ – क्षामा॑ रु॒क्मो᳚ –
ऽष्टात्रिग्ं॑शच्च) (अ. 10)

अग्ने॒ यं -यँ॒ज्ञम॑द्ध्व॒रं -विँ॒श्वतः॑
परि॒भूरसि॑ । स इद्दे॒वेषु॑ गच्छति ॥ सोम॒
यास्ते॑ मयो॒भुव॑ ऊ॒तय॒ -स्सन्ति॑ दा॒शुषे᳚ ।
ताभि॑र्नो -ऽवि॒ता भ॑व ॥ अ॒ग्निर्मू॒र्धा भुवः॑ ॥
त्वन्न॑ -स्सोम॒ , या ते॒ धामा॑नि ॥ त -
थ्स॑वि॒तुर्वरे᳚ण्य॒ -म्भर्गो॑ दे॒वस्य॑ धीमहि ।
धियो॒ यो नः॑ प्रचो॒दया᳚त् ॥ अचि॑त्ती॒
यच्च॑कृ॒मा दैव्ये॒ जने॑ दी॒नैर्दक्षैः॒
प्रभू॑ती पूरुष॒त्वता᳚ । 43

दे॒वेषु॑ च सवित॒र्मानु॑षेषु च॒ त्वन्नो॒ अत्र॑
सुवता॒दना॑गसः ॥ चो॒द॒यि॒त्री सू॒नृता॑ना॒ -
ञ्चेत॑न्ती सुमती॒नाम् । य॒ज्ञ -न्द॑धे॒ सर॑स्वती
॥ पावी॑रवी क॒न्या॑ चि॒त्रायु॒ -स्सर॑स्वती
वी॒रप॑त्नी॒ धिय॑ -न्धात् । ग्नाभि॒रच्छि॑द्रग्ं
शर॒णग्ं स॒जोषा॑ दुरा॒धर् ष॑ -ङ्गृण॒ते शर्म॑
यग्ंसत् ॥ पू॒षा गा अन्वे॑तु नः पू॒षा
र॑क्ष॒त्वर्व॑तः । पू॒षा वाजग्ं॑ सनोतु नः ॥
शु॒क्र -न्ते॑ अ॒न्यद्य॑ज॒त -न्ते॑ अ॒न्य - [अ॒न्यत् ,
विषु॑रूपे॒ अह॑नी॒ द्यौरि॑वासि ।] 44

-द्विषु॑रूपे॒ अह॑नी॒ द्यौरि॑वासि । विश्वा॒ हि
मा॒या अव॑सि स्वधावो भ॒द्रा ते॑ पूषन्नि॒ह
रा॒तिर॑स्तु ॥ ते॑ -ऽवर्धन्त॒ स्वत॑वसो महित्व॒ना
ऽऽनाक॑ -न्त॒स्थुरु॒रु च॑क्रिरे॒ सदः॑ । विष्णु॒
र्यद्धा -ऽऽव॒ -द्वृष॑ण -म्मद॒च्युतं॒ -वँयो॒ न
सी॑द॒न्नधि॑ ब॒र्॒हिषि॑ प्रि॒ये ॥

प्रचि॒त्रम॒र्क -ङ्गृं॑ण॒ते तु॒राय॒ मारु॑ताय॒
स्वत॑वसे भरद्ध्वम् । ये सहा॒ग्ं॑सि॒ सह॑सा॒
सह॑न्ते॒ [सह॑न्ते , रेज॑ते अग्ने पृथि॒वी
म॒खेभ्य॑ः ।] 45

रेज॑ते अग्ने पृथि॒वी म॒खेभ्य॑ः ॥ विश्वे॑ दे॒वा
विश्वे॑ देवाः ॥ द्यावा॑ नः पृथि॒वी इ॒मग्ं
सि॒द्ध्रम॒द्य दिं॑वि॒स्पृश ᳚म् । य॒ज्ञ -
न्दे॒वेषु॒ यच्छताम् ॥ प्र पू ᳚र्व॒जे पि॒तरा॒
नव्य॑सीभिर्गी॒र्भिः कृं॑णुद्ध्व॒ग्ं॒ सद॑ने
ऋ॒तस्य॑ । आ नो ᳚ द्यावापृथिवी॒ दैव्ये॑न॒ जने॑न
यात॒ -म्महिं॑ वा॒ं -वँरू॑थम् ॥ अ॒ग्निग्
स्तोमे॑न बोधय समिधा॒नो अम॑र्त्यम् । ह॒व्या
दे॒वेषुं॑ नो दधत् ॥ स हं॑व्य॒वाडम॑र्त्य
उ॒शिग्दू॒तश्चनो॑हितः । अ॒ग्निर्धि॒या
समृं॑ण्वति ॥ शन्नो॑ भवन्तु॒ , वाजे॑वाजे ॥ 46 ॥
(पु॒रु॒ष॒त्वता॑ - यज॒तन्ते॑ अ॒न्यथ् -
सह॑न्ते॒ - चनो॑हितो॒ - ऽष्टौ च॑) (अ . 11)

(यु॒ञ्जा॒न - इ॒मामं॑गृभ्णन् - दे॒वस्य॒ - सन्ते॒ - वि
पाज॑सा॒ - वस॑वस्त्वा॒ - समा᳚स्त्वो॒ - र्ध्वा -
अ॒स्याकू॑ति॒ं - यँद॑ग्ने॒ यान् - यग्ने॒ यं -
यँ॒ज्ञ - मेका॑दश)

(यु॒ञ्जा॒नो - वर्म॑ च स्थ - आदि॒त्यस्त्वा॒ -
भार॑ती॒ - स्वाग्ं अ॒हग्ं - षट्च॑त्वारिग्ंशत्)

(यु॒ञ्जा॒नो , वाजे॑वाजे)

॥ हरिः॑ ओम् ॥

॥ कृष्ण यजुर्वेदीय तैत्तिरीय संहिताया -ञ्चतुर्थ
काण्डे प्रथमः प्रश्न -स्समाप्तः ॥

Sri Amritananda Natha Guruvu Garu, Amrita Nilayam, Gowravaram Village & Post, Kavali Mandal, Nellore District, Andhra Pradesh.
Phone Number: +91 9493475515 | www.amritanilayam.org